CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भुशुण्डिरामायणे रामचरणपादुका पूजा-प्रसंगः (व्याख्यानम्)

— श्री गणेश्वरशास्त्रि द्राविड़

अथ भुशुण्डिरामायणस्य दक्षिणखण्डे ५५ तमेऽध्याये स्थितानां मन्त्रपराणां केषान्चिच्छ्लोकानां व्याख्यानं यथामति क्रियते। तत्र "प्रणवो वाग्भवं माया कमला व्योम चन्द्रमाः। चण्डीशश्च शिखीशश्च वह्निन झिण्डीश विंदुभाक्॥ अयमेकः सुमन्त्रज्ञैः कूटमन्त्र उदाहृतः" इति पूर्वमुक्तम्। तत्र प्रणवः - ओंकारः। वाग्भवं ऐं बीजम्। मायाबीजपदेन ह्रीं कारो विवक्षितः। तस्यैव प्रसिद्धत्वात्। कमला श्रीं बीजम्। एतदुत्तरं 'व्योम" इत्यारभ्य ""भाग्" इत्यन्तमेकमेव बीजमिह प्रतिपाद्यमिति तन्त्रज्ञाः। तत्र व्योमपदेन हकारो ग्राह्यः, "चक्षुषी कमला-ऽवतु" इत्युत्तरं "हकारो नासिकां पातु इत्यंग्रिमाध्यायस्थकव चैकवाक्यत्वात्। चन्द्रमाः सकारः "सकारः श्रवसी च मे" इति कवचवाक्यैकवाक्यत्वात्। चण्डीशः खकारः, "क्रुधार्द्धिगदि चण्डीशाः" इत्यादि मातृका कोशात्। "षकारो गण्डयुग्मं मे" इति मूर्ध्न्यषकारघटितो मुद्रितकवचपाठस्त्वशुद्धेः। चण्डीशपदेनेह व्यंजनद्वितीयस्यैवोपलम्भात्। तस्मात् कवचे "खकारो गण्डयुग्मं मे" इति मूर्द्धन्य षकाररहितेन व्यंजनद्वितीय घटितेन पाठेन शुद्धेन भाव्यम्।

शिरवीशः - फकारः, "शिखी वह्निनतारैश्च विन्दुनादकलान्वितैः कार्तवीर्यार्जुनस्येदं वीजं प्रोक्तं महेश्वरि॥ फ्रों॥" इति बीज कोशे शिखीश पदेन तस्यैव ग्रहणात्। वह्निनः - रेफः, रेफोग्निः' इति मातृकाभिधानात्। झिण्डीशः - एकारः वर्णन्बीजकोशे तथैवोपलम्भात्। 'बिन्दुभागित्यस्य बिन्दुयुक्तः इत्यर्थः। तथा च "व्योम चन्द्रमाः चण्डीशश्च शिखीशश्च वह्निनझिण्डीशबिन्दुभाग्" इत्यस्य "हस्द्रक्ल्रें (ह् स् ख् फ्रें" इत्यर्थः। दनुसारम् "ॐ ऐं ह्रीं श्रीं हस्क्ल्रें" इति प्रथमो मन्त्रः फलितः। "अयमेकः सुमन्त्रज्ञैः कूटमन्त्र उदाहृतः" इति तु स्पष्टम्। अथ द्वितीयो मन्त्र उच्यते "व्योम शीतांशु वर्गान्त्य महाकालीश भू सुधा। वह्निनः समीरणोऽर्धीश बिन्दुयुक्तो द्वितीयकः। कूटमन्त्रः समाख्यातः सकलागमवेदिभिः॥" इति। तत्र "व्योम" इत्यारभ्य "युक्त" इत्यन्तमेकमेव बीजं प्रतिपाद्यमिति तन्त्रज्ञाः। तत्र व्योम-हकारः, तस्यैव प्रसिद्धत्वांत्। शीतांशुः सकारः, पूर्वमन्त्रे तस्यैव ग्रहणात, बाधकाभावाच्च। वर्गान्त्यः क्षकारः अन्तिमाक्षरः" इति मातृकाकोशात् "षवर्गेऽन्त्यः" इत्यादि मातृकाभिधानात् चेह विशेषणाभावे वर्गान्त्य पदेनान्त्यवर्गान्सग्रहणस्यैव युक्तत्वात्। महाकालीशः -मकारः, "वैकुण्ठश्च महाकालः" इत्यादि मातृका-कोशात् पूर्वं चण्डीशादिपदेष्वीशपदसहितस्यैव ग्रहणात, महाकालीशस्य कोषे स्वतन्त्रतयाऽनुपलंम्भे महाकालग्रहणस्यैवोचितत्वाच्च। भूः-लकारः, तत्पदेन तस्य प्रसिद्धत्वात्। सुधा-वकारः, "अमृतं शुचिः" इति मातृकाभिधानात, तस्यैव प्रसिद्धत्वात, शीतांशुपदेन पूर्वं सकारस्य गतत्वाच्च। वह्निनः-रेफः। समीरणः- यकारः, "क्षुधा बाला च वायुः" इति मातृका कोशात, वायु बीजपदेन तस्यैव प्रसिद्धत्वात् च। अर्धीशः ऊकारः (दीर्घः), "अर्धीशो दीपिका" इत्यादि मातृकाकोशात्। "अर्धीश्वरो मधुसूदनः" इत्यादि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मातृकाभिधानाच्च । तेन बिन्दुना च युक्त इत्यर्थः । तथा च "हस्क्षम्ल्व्यूं (ह् स् क्ष् म् ल् व् र् यूँ)" इति बीजाक्षररूपो द्वितीयो मन्त्रः पर्यवसितः । अत्रेदं बोध्यम्- "समीरणो र्शीश बिन्दुयुक्तः" इति "समीरणो-र्धीश बिन्दुयुक्तः" इति तवर्ग चतुर्थाक्षरघटितमुपलब्धं पाठद्वयं प्रमादिकम् । शुद्धपाठस्तु रेफसहित कवर्ग चतुर्थाक्षरघटितः "समीरणोऽर्धीशबिन्दुयुक्तः" इत्येव ।

अन्यथा "द्वितीयः पुनरूकारस्थान ईकारयुग्भवेत्" इत्यग्रेतन वाक्यस्यासंगत्यापत्तेः । "अर्धीशेति" चतुर्थव्यंजनघटितपाठाभावे द्वितीयमन्त्रे ऊकारस्याप्रसक्तेः । इति । अथोक्तयोर्मन्त्रयोर्मध्ये प्रथममन्त्रे "व्योमचन्द्रयोः स्थाने "चन्द्रव्योम्नो" र्योजने तृतीयो मन्त्रो निष्पद्यत इत्याह "प्रथमः पुनराकाशश्चन्द्रव्यत्यासतो भवेत्" इति । अत्र चन्द्रव्यत्यासतः आकाशो यदि भवति तर्हि प्रथमो मन्त्रः पुनरेको मन्त्रः (तृतीयो मन्त्रः) भवेदिति योजना । तृतीयमन्त्रस्य स्वरूपं तु "ॐ ऐं ह्री श्रीं स्हस्क्रफ्रें (स् ह् स् क्र् फ्रें)" इति । एवं द्वितीय मन्त्रे पूर्वोक्ते पूमित्यत्र ऊकारस्थाने ईकारयोजने चतुर्थो मन्त्रो निष्पद्यत इत्याह "द्वितीयः पुनरुकारस्थान ईकार युग्भवेत्" इति । अत्र "द्वितीयो मन्त्रः ऊकारस्थाने ईकार युग् यदि भवति तर्हि पुनः एकोमन्त्रः (चतुर्थो मन्त्रः) भवेत्" इति योजना । अस्य (चतुर्थस्य) मन्त्रस्य स्वरूपं तु "हस्क्ष्म्ल्व्र्यीं (ह् स् क्ष् म् ल् व् र् यीं) इति । इमावेव (तृतीय चतुर्थावेव) मन्त्रावग्रिमाध्याये कवचे "तृतीयः ककुदं पातु चतुर्थीऽसयुगं सदा" इत्यत्र ग्रहीताविति बोध्यम् । अथैक त्रिंशद्वर्णं पादुकामन्त्रमाह– "रां रामचन्द्रसहजानन्दिनी युग्मपूर्वकम् । श्री पादुकां पूजयामि नम इत्यन्ततो वदेत् । एकत्रिंशद्वर्ण एष पादुकामन्त्र ईरतः ॥" इति । तत्र रां रामचन्द्र सहजानन्दिनी" इत्येतदन्तमेका दश वर्णा जाताः । तदुत्तरं युग्मपदश्रवणात् "रामचन्द्रसहजानन्दिनी" इति पुनः पठनीयम् उभयोर्मेलने एक विंशति वर्णाः सम्पद्यन्ते । तदुत्तरं "श्री पादुकां पूजयामि नमः" इत्यस्य योजने "रां रामचन्द्रसहजानन्दिनी रामचन्द्र सहजानन्दिनी श्री पादुकां पूजयामि नमः" इत्येक त्रिंशद्वर्णघटितः पादुका मन्त्रो निष्पन्नः । अग्रिमाध्याये कवचे "युग्मं मे हृदयं पातु श्री रामसहजात्मकम्" इति यदुक्तं तत्तु छन्दोनुरोधेन संक्षिप्योक्तम् । तस्यार्थस्तु "श्री रामचन्द्रसहजानन्दिनी" इत्येव । अन्यथा इह श्रुत युग्मपदस्वारसिकार्थविलोपप्रसंगात् । अन्यथा रीत्या इह श्रुताद् वाक्यादेव त्रिंशद्वर्ण घटित मन्त्रस्य उपपादयितुमशक्यत्वाच्च । कवचेऽग्रे यदुक्तं "रामश्री पादुका पातु" इत्यादि तत्सर्वम् एतन्मन्त्रांशस्यैव विवरणभूतम् । नातः पूर्वापरविरोधः । "रामः श्री पादुका इति विसर्गयुक्तः पाठस्तु प्रामादिक एव । इष्टार्थाः निष्पत्तेः । अथास्य मन्त्रस्यार्थ उच्यते– "श्री पादुकेत्यनेन रामपादुके विवक्षिते । "वन्दे श्री पादुकायुग्मं रामस्य परमात्मनः" इत्यग्रिमाध्यायस्थवाक्यार्थानुरोधात् । अग्रे ध्यानश्लोके द्विवचनान्तप्रयोगात् पूर्वसन्दर्भात् "श्री रामपादुकायुग्ममन्त्रतंत्वमनुत्तमम्" इत्येतदध्यायान्तिमवाक्याच्च । इहैकवचनान्तप्रयोगो जात्येकवचनाभिप्रायकः । ते पादुके रामचन्द्रस्य कृते सहजतः- स्वभावत एव कण्डकादित्राणत आनन्द दायिन्यौ" इति पादुका पद सन्निहित "रामचन्द्रः सहजानन्दिनी" पदस्यार्थः पूर्वं पठित तत्पदार्थस्तु "भरतानन्ददायिन्यौ" इति । ते पूजयामि नम इति पर्यवसितम् । अस्य रहस्यार्थस्तु ध्यान श्लोकानुसारी बोध्यः । बीजार्थस्तु गुरुमुखादवमन्तव्यः । अथास्य पादुकामन्त्रस्यर्ष्यादि वक्तुं प्रक्रमते "नारायण ऋषिश्चास्य च्छन्दोऽनुष्टुबिति स्मृतः । श्री पादुकाख्या नियतं परमात्माऽस्य देवता हंसो बीजं तथा सोऽहं शक्तिरित्युच्यते बुधैः । वाग्भवं कीलकं प्रोक्तं मन्त्रागमविशारदैः । चतुर्वर्गे च मन्त्रस्य विनियोगः प्रकीर्तितः । षद्दीर्घस्वरसंयुक्तैः-हंसवर्णैः षडंगकम् । एवं विधाय कर्तव्यं पादुकाध्यानमुत्तमम्" इति । अस्यार्थः- अस्य श्रीपादुकामन्त्रस्य नारायण ऋषिः । अनुष्टुप् छन्दः । श्री पादुकाख्य परमात्मा देवता । हंसः बीजम् । सोऽहं शक्तिः ऐं कीलकम् । चतुर्विध पुरुषार्थसिद्धयर्थे जपे विनियोगः । हंसो हृदयाय नमः । हंसीं शिरसे स्वाहा । हंसूं शिखायै वषट् । हंसैं कवचाय हुम् । हंसौ नेत्रयाय वौषट् हंसः अस्त्राय फट् । इति । एवमेव करन्यासोऽपि विधेय इत्यर्थ सिद्धम् । अथ ध्यानमाह "मुक्ताविदुम हेमहीर घटित श्रीपीठ

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राजोत्तमे, दीव्यन्त्यौ विलसन्निसर्गं परमानन्दप्रकाशादद्भुते । विस्फूर्जत् तरुणार्ककोटिकिरणव्याकीर्णशुद्धाम्बरे सच्चिद्रूपघने घनाघतिमिरस्तोमैकनाशोद्भटे ॥ भक्तानां शिरसि प्रकाशपटली फुल्लत्सहस्रच्छदे, पद्मेऽखण्डलचन्द्र मण्डलगत श्रीहंस पीठोत्तमे । तिष्ठन्त्यौ निजपूर्ण धामनि सदा कल्याण दिव्यास्पदे मायामोहमदान्धकारशमने सेव्ये विभोपादुके ॥" इति । एतदुत्तरम् । "एवं ध्यात्वा जपेन्नित्यष्टोत्तरसहस्रकम् । गन्धपुष्पादिभिर्नित्यं पूजयेत् भावकल्पितैः तत्रैव स्वस्य शिरसि सहस्रच्छदमन्दिरे । भावयेत्सन्ततं दिव्यं भक्तिभावपरायणः ॥ पुरश्चर्यां तथा कुर्यान्मन्त्रराजस्य साधकः । पुण्यतीर्थे सुविमले मेध्याशी मितभाषणः दशलक्षं जपित्वा तु दशांशं हवनं चरेत् । नीलोत्पलैस्त्रिमधुरोन्मिश्रैर्मन्त्रस्य सिद्धये । तर्पणं मार्जनं चैव ब्रह्मभोजनमेव च । यत्किंचित् विधिवत्कुर्यात् तत्र तत्र निवेदयेत् । [१] श्री रामस्य पादुका युग्मे रामार्पण धिया बुधः । निवेदितं श्रीरामस्य सर्वकर्मामितं भवेत् ।" इत्याद्युक्तं, तत्र । तत्सर्वं विस्तरभयान्न व्याख्यायते । महतामनुरोधेन मन्त्रोध्दारार्थं व्याख्यानमिदं कृतम् । अत्र दोषश्चेद् विद्वद्दिभः सनिरसनीयः । अन्यद्विवरणं तु भुसुण्डिरामायणे कृतमेव । अनुपलब्धमातृकाणां कृते ध्यान श्लोकाद्यपि संगहीतमिहेति शिवम् । इदं व्याख्यानं वाराणसीवास्तव्येन श्री गणेश्वर शास्त्री द्राविडेन २०४४ तमे वैक्रमाब्दीयाश्विन् शुक्ल त्रयोदश्यामिन्दुवासरे पूर्णां कृत्वा श्री रामचन्द्रचरणाब्जयोः समर्पितम् । प्रीयतामनेन भगवान् श्री रामचन्द्रः ॥ इति शम् ॥

★★★

१ अत्र यथोपलब्धः पाठः स्थापितः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.